यथा शाकुन्तले । "अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्य" ।)

वरणस्य छत्रं । यत्नः । इति मेदिनी ॥ कविनामयुक्तगानसमापककविता । भणिता इति भाषा । यथा,—

"यत्रैव कविनाम स्यात् स आभोग इतीरितः" ।

इति सङ्गीतदामोदरः ॥

आभ्युदयिकं, त्रि, (अभ्युदयः प्रयोजनम् अस्य । अभ्युदय् + ठक् ।) अभ्युदयनिमित्तश्राद्धादि । यथा । अथाभ्युदयिकश्राद्धं । तत्र गोभिलः । आभ्युदयिके श्राद्धे युग्मानाशयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः । सम्पन्नमिति तृप्तिप्रश्नः । दधिबदराक्षतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तां न स्वधाञ्च प्रयुञ्जीत इति । अभ्युदयो विवाहादिस्तदर्थं श्राद्धं आभ्युदयिकं । आभ्युदयिके अभ्युदयनिमित्तके । अभ्युदयः इष्टलाभः । स च भूतभविष्यद्भेदेन द्विविधः । तत्र भूतं पुत्त्रजन्मादि भविष्यत् विवाहादि । एवञ्च श्राद्धविवेकादौ श्राद्धभेदगणने वृद्धिश्राद्धत्वेन कर्म्माङ्गत्वेन च यदुभयत्वमुक्तं तदुभयमेवात्राभ्युदयिकत्वेनोपपन्नं तेनाभिलापे आभ्युदयिकश्राद्धमिति प्रयोज्यं । अत्र यवैस्तिलार्थ इत्यनेन पार्व्वणश्राद्धप्राप्ततिलस्थाने यवविधानात् आभ्युदयिकस्यापि पार्व्वणप्रकृतित्वं प्रतीयते । अन्यथा तिलार्थं इत्युपादानं व्यर्थं स्यात् । ततश्च पार्व्वणप्रकृतिकत्वेन पित्र्ये अयुग्मब्राह्मणप्राप्तौ तन्निराशाय पितृपक्षे ब्राह्मणयुग्मत्वोपदेशः दैवे युग्मत्वस्य पार्व्वणप्राप्तत्वान्नतदर्थोपदेशः ।

"अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणं" ।

इति याज्ञवल्क्यवचनेन देवकर्म्मानन्तरं पितृकर्म्मकरणे प्राप्तवामोपचारनिराशाय प्रदक्षिणमुपचारः तेन देवपितृकर्म्मकरणाय दक्षिणावर्त्तेन गन्तव्यं । द्विगुणभुग्नत्वनिराशाय ऋजवो दर्भा इति ऋजुत्वोपदेशः । दृप्ताः स्थ इत्यनेन तृप्तिप्रश्ने सम्पन्नमिति प्रष्टव्यं । योग्यत्वात् सुसम्पन्नमिति प्रोक्ते इति वक्ष्यमाणच्छन्दोगपरिशिष्टवचनाच्च सुसम्पन्नमित्युत्तरं । एतद्धर्म्मयब्राह्मणपक्षेप्यबाधितत्वाद्बोध्यं । दधिबदराक्षतमिश्रा इत्यनेन दध्यादिमिश्रणमावश्यकं । अक्षता यवः ।

"अक्षताश्च यवाः प्रोक्ता भृष्टा धाना भवन्ति ते" ।

इति भट्टनारायणधृतात् । अतएव वक्ष्यमाणच्छन्दोगपरिशिष्टवचने अक्षतमनुक्त्वा संयोज्य यवकर्कन्धुदधिभिरिति निःसन्दिग्धमुक्तं । स्वधावाचनप्रश्ननिवृत्तये नान्दीमुखाः पितरः प्रीयन्तामित्युपदेशः । तत्र स्वधां वाचयिष्ये इति पितृपक्षएव प्रश्नः अतएव तन्निवृत्तये दैव इति आदौ देवपक्षे नान्दीमुखाः पितरः प्रीयन्तामिति प्रश्नः । उत्तरञ्च प्रीयन्तामिति । ततः पितृपक्षे स्वधावाचनस्थानीयत्वेन वृद्धप्रमातामहेभ्यश्च इति चकारनिर्देशेन च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति एच्छेत् प्रत्युत्तरञ्च अस्तु स्वधा इतिवत् तन्त्रेणैव प्रीयन्तामिति । अत्र नान्दीमुखाः पितर इत्यादि नान्दीमुखेभ्यः पितृभ्य इति निर्देशेन च नान्दीमुखं पितृगणमिति विष्णुपुराणेन च मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव च इति ब्रह्मपुराणेन च नान्दीमुखपदश्रुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवतात्वं ततश्चात्रापि प्रीयन्तामितिवन्नान्दीमुखेभ्यः पितामहेभ्य इति वाच्यं । न तु नान्दीमुखविशेषणशून्यं पितामहेभ्यः प्रीयन्तामिति पितृदयितोक्तं युक्तम् । नान्दीमुखेभ्यः पितृभ्य प्रीयन्तामित्यत्रान्वितस्य नान्दीमुखेभ्य इत्यस्य पितामहेभ्य इत्यादावनन्वयित्वेन प्रागुक्तयुक्त्या प्राप्तस्य नान्दीमुखविशेषणस्य पितामहेभ्य इत्यादावपि प्राप्तेः । एतेनात्र मैथिलोक्तं तन्त्वताविधानमपि निरस्तं । पार्व्वणवत् स्वधाः प्राप्तेः तन्निराशाय न स्वधां प्रयुञ्जीतेति अत्र विशेषादभिलापे मन्त्रे च स्वधापदनिवृत्तिः । अभिलापे नम इति ब्रूयात् । "अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः" । इति ब्रह्मपुराणे श्राद्धे स्वधा नमः पदयोस्त्यागबोधकत्वेन विकल्पादाभ्युदयिके स्वधानिषेधान्नम एवान्वेति । पितृनप्यत्र देववदित्यनेनापि पार्व्वणोक्तविश्वदेवपद्धीयनम एव प्रतीयते न तु मैथिलोक्तं स्वाहेति । श्राद्धे तथा प्रयागे प्रमाणाभावात् । एवमाश्वलायनगृह्ये यवोसीति मन्त्रे तु पुष्ट्या इति श्रुतेर्मन्त्रमात्रे स्वधापदस्थाने पुष्टिपदप्रयोगः । इति श्राद्धतत्त्वं । अन्यत् नान्दीमुखशब्दे द्रष्टव्यं ॥

आमं, त्रि, (आम्यते ईषत्पच्यते । आ + अम + कर्म्मणि घञ् ।) पाकरहितं । काँचा इति भाषा । तत्पर्य्यायः । अपक्वं २ असिद्धं ३ अमृतं ४ । इति रत्नमाला ॥

("आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः" । इति वैद्यकचक्रपाणिसंग्रहः ॥

"मज्जत्यामागुरुत्वाद्विट् पक्वातूत्प्लवते जले । विनातिद्रवसङ्घातशैत्यश्लेष्मप्रदूषणात् ॥ परीक्ष्यैवं पुरा सामं निरामं वा सदोषिणां । विधिनोपाचरेत्सम्यक् पाचनेनेतरेण वा" ॥

चिकित्सा यथा,—

"चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च । व्योषं हिङ्ग्वजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत् ॥ गुड़िका मातुलुङ्गस्य दाड़िमस्य रसेन वा । कृता विपाचयत्यामन्दीपयन्त्याशु चानलं" ॥

इति चित्रकाद्यागुड़िका । इति चरकः ॥)

आमं, क्ली, षट्प्रकाराजीर्णरोगमध्ये रोगविशेषः । तस्य कारणरूपे ।

"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च । वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं ॥ तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटगः । उद्गारश्च यथाभुक्तमविदग्धः प्रवर्त्तते" ॥

इति निदानं ॥ अन्यच्च ।

भुक्तमन्नाबशेषं यत् रसं भूयस्त्वपाचितं । गतमामाशये यस्मात्तस्मादामं तदुच्यते ॥ अन्नमन्नरसं केचित् केचिच्च मलसञ्चयं । प्रथमां दोषदुष्टिञ्च आममित्यभिधीयते ॥

अपक्वं । यथा,—

"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते । आमं वितुषमित्युक्तं खिन्नमन्नमुदाहृतं" ॥

इति श्राद्धतत्त्वधृतवशिष्ठवचनं ॥ रोगविशेष तल्लक्षणादि अजीर्णशब्दे द्रष्टव्यं ॥

("उष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितं । दुष्टमामाशयगतं रसमामं प्रचक्षते ॥ आमेन तेन संपृक्ता दोषादूष्याश्च दूषिताः । सामाइत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥ स्रोतोरोधबलभ्रंशगौरवानिलमूढ़ताः । आलस्यापक्तिनिष्ठीवमलसङ्गारुचिक्लमाः ॥ लिङ्गं मलानां सामानां निरामाणां विपर्य्ययः" ।

इति चरकः ॥

"आमेऽजीर्णे तु वन्धयेत् क्षारास्तं लघु शस्यते । पुष्पकासीशमिश्रं वा क्षीरेण लवणेन च । सदाड़िमरसं सर्पिः पिबेद्वातेऽधिके सति" ॥

इति च चरकः ॥)

आमः,पुं, (अम + घञ् ।) रोगमात्रं । रोगभेदः । इति मेदिनी ॥ मलवैषम्यरोगः । इति राजनिर्घण्टः ॥ ("पिबेत् स परिकर्त्तामे मले वा दाड़िमाम्बुना । विड़ेन लवणं पिष्टं विल्वं चित्रकनागरं" ॥

इति चरकः ।)

आमगन्धि, क्ली, (आमस्यापक्वस्य गन्धइव गन्धो यत्र ।) चिताधूमादिगन्धयुक्तं । अपक्वमांसादिगन्धविशिष्टं । तत्पर्य्यायः । विस्रं २ विश्रं ३ । इत्यमरः ॥

आमण्डः, पुं, (आमण्डयतीति । आ + मड़ि + पचाद्यच् ।) एरण्डवृक्षः । इति राजनिर्घण्टशब्दरत्नावल्यौ ॥ (एरण्डशब्देऽस्य गुणादयो ज्ञातव्याः ।)

आमनस्यं, क्ली, (अमनसो भावः । ब्राह्मणादित्वात् ष्यञ् ।) पीड़ा । दुःखं । इत्यमरः ॥

आमन्त्रणं, क्ली, (आ + मन्त्र + भावे ल्युट् ।) सम्बोधनं । इति हेमचन्द्रः ॥ आप्रच्छनं । इति जटाधरः ॥ निमन्त्रणं । इति स्मृतिः ॥ निमन्त्रणविशेषः । यदकरणे प्रत्यवायो नास्ति । यथा "इह शयीत भवान्" । इति मुग्धबोधव्याकरणं ॥

आमयं, क्ली, (आमं रोगं याप्यनेन । आम + या + ड ।) कुष्ठनामौषधिः । इतिराजनिर्घण्टः ॥ कुड़ इति भाषा ।

आमयः, पुं, (अम रोगे + भावे + घञ् । मीञ् हिंसायां करणे अच् वा ।) रोगः । इत्यमरः ॥ ("तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून्" । इति सुश्रुतः ॥

"तत्र व्याधिरामयो गद आतङ्को यक्ष्माज्वरो विकारो रोग इत्यनर्थान्तरं" । इति चरकः ॥)

आमयावी, [न्] त्रि, (आमयोऽस्त्यस्य आमयस्योपसंख्यानं इति दीर्घश्चेति विनिः) रोगी । इत्यमरः ॥